# वेदाङ्गानि : आवश्यकता स्वरूपञ्च

**विष्णु प्रसाद उपाध्याय**
**वरिष्ठशोधाध्येता**
**संस्कृतसंवर्धनप्रतिष्ठानम्**

**सारांशः**

अस्मिन् लेखे वेदाङ्गाम् आवश्यकता स्वरूपञ्च प्रतिपाद्यते । षडङ्गानि वेदस्याध्ययने साहायकानि भवन्ति । षडङ्गानामध्ययनेन वेदानां मन्त्राणाम् अर्थविषये, भाषाविषये, उच्चारणविषये शब्दानां व्युत्पत्तिविषये च ज्ञानं सुदृढं भवति ।

## प्रस्तावना

वैदिकवाङ्मयस्य चत्वारः वेदाः अर्थात् **ऋग्वेदः, यजुर्वेदः, सामवेदः अथर्ववेदः चेति** । ब्राह्मणग्रन्थानाम् आरण्यकग्रन्थानाम् उपनिषद् ग्रन्थानाम् अनन्तरं वेदाङ्गस्य स्थानम् आयाति । **'वेदाङ्गम्'** इत्युक्ते किम् अस्मिन् विषये पूर्वं ज्ञानम् अपेक्षितम् अस्ति । **वेदाङ्गः** इत्यत्र शब्दद्वयम् अस्ति । **एकः वेद अपरश्च अङ्ग इति** वेदशब्दः विद्-धातोः घञ् प्रत्यये कृते सति निष्पद्यते । यस्यार्थः भवति **ज्ञानम्** इति, पुनः **अङ्गस्य** अर्थः भवति **अंग्यन्ते ज्ञायन्ते एभिः इति अङ्गानि** अर्थात् येन वस्तुनः स्वरूपसस्य बोधः स्यात् तत् अङ्गम् अस्ति । इत्थं वेदाङ्गस्य सम्पूर्णः अर्थः भवति - वेदानां वास्तविकम् अर्थं ज्ञातुं येषां साधनानाम् आवश्यकता भवति तस्य नाम वेदाङ्गमिति । सर्वप्रथमं वेदाङ्गस्य वर्णनं मुण्डकोपनिषदि प्राप्यते -

**तत्तापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दः ज्योतिषमिति ।**

अर्थात् वेदाङ्गानां वर्णनं वेदानाम् अनन्तरमेव जातम् ।

**एतेषु वेदेषु मुख्यतया वर्णिताः विषयाः सन्ति -**

- **ऋग्वेदे** विभिन्नानां देवतानां वर्णनपुरस्सरम् ईश्वरस्य स्तुतिः च अस्ति ।
- **यजुर्वेदे** यज्ञसम्बद्धा सर्वा अपि प्रक्रिया वर्णिता अस्ति ।
- **सामवेदे** उपासनायाः विधिः वर्णितः अस्ति ।
- **अथर्ववेदे** गुण-धर्म-आरोग्यसम्बद्धः विषयः वर्णितः अस्ति ।

एतादृशं सर्वज्ञानमयं वेदं ज्ञातुं वेदाङ्गानामावश्यकता भवति। तानि च षट् सन्ति -

**शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः।**
**ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु[1]॥**

**एतानि अङ्गानि वेदस्य कीदृग्रूपेण सन्ति इति अधस्तनेन श्लोकेन उच्यते -**

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥[2]**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्**
**तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते॥[3]**

अङ्गस्यार्थोऽस्ति चिह्नमिति। यथा अङ्गानि विना सम्पूर्णं शरीरं पूर्णं न भवति, तथैव षडङ्गानां विना वेदः अपि पूर्णः न भवति। एतेषु षडङ्गेषु प्रथमम् अङ्गम् अस्ति शिक्षा इति –

(१) शिक्षा - एतस्याः अर्थः अस्ति स्वरः वर्णादुच्चारणप्रकारो यत्र शिक्ष्यते उपदिश्यते सा शिक्षा इति अर्थात् स्वरवर्णादीनाम् उच्चारणस्य शिक्षा यत्र भवति तत् शिक्षाशास्त्रम् अस्ति। अस्मिन् शास्त्रे मुख्यरूपेण वर्ण-स्वर-मात्रा-बल-साम-संतानेषु विषयेषु अवधानं दीयते ।

अधुना क्रमेण एतान् बिन्दून् पश्यामः -

- **वर्णः - अर्थात् अ, आ, इ, उ, ऋ, लृ, ए, ओ, ऐ, औ इत्यादयः चतुष्षष्टिः वर्णाः**

यथायोग्यरूपेण वर्णानाम् उच्चारणस्य प्रक्रियां पाणिनीयशिक्षा शिक्षयति। अतः वयम् एतां वर्णोच्चारणशिक्षामपि पश्यामः।

यथा -

| | | |
|---|---|---|
| **कण्ठः** | - | अकुहविसर्जनीयानां कण्ठः – (अ, क्, ख्, ग्, घ्, ङ्, ह् : = विसर्गः ) |
| **तालुः** | - | इचुयशानां तालुः – (इ, च्, छ्, ज्, झ्, ञ्, य्, श् ) |
| **मूर्धा** | - | ऋटुरषाणां मूर्धा – (ऋ, ट्, ठ्, ड्, ढ्, ण्, र्, ष्) |
| **दन्तः** | - | लृतुलसानां दन्तः – (लृ, त्, थ्, द्, ध्, न्, ल्, स्) |
| **ओष्ठः** | - | उपूपध्मानीयानां ओष्ठौ – (उ, प्, फ्, ब्, भ्, म्, उपध्मानीय प्, फ्) |
| **नासिका** | - | ञमङणनानां नासिका च (ञ्, म्, ङ्, ण्, न्) |
| **कण्ठतालुः** | - | एदैतोः कण्ठतालुः – (ए, ऐ) |
| **कण्ठोष्ठम्** | - | ओदौतोः कण्ठोष्ठम् – (ओ, औ) |
| **दन्तोष्ठम्** | - | वकारस्य दन्तोष्ठम् (व) |
| **जिह्वामूलम्** | - | जिह्वामूलीयस्य जिह्वामूलम् (जिह्वामूलीय क्, ख्) |
| **नासिका** | - | नासिकानुस्वारस्य (ं = अनुस्वारः) |

[1] वैदिक-साहित्यम् एवञ्च संस्कृतिः पृ. १२९
[2] पाणिनीयशिक्षा - ४१
[3] पाणिनीयशिक्षा - ४२

- **स्वरः** - स्वरवर्णानाम् उच्चारणसमये स्वाराघाते विशेषरूपेण अवधानं प्रदीयते। यतो हि स्वराघातेन शब्दानाम् अर्थान् निर्धारयितुं शक्यते। एते स्वराः **उदात्त-अनुदात्त-स्वरितभेदेन** त्रिविधाः भवन्ति -
  - **उच्चैरुदात्तः**[4] - ताल्वादिषु सभागेषु ऊर्ध्वभागेषु निष्पन्नः अच् उदात्तसंज्ञको भवति।
  - **नीचैरनुदात्तः**[5] - ताल्वादिषु सभागेषु अधोभागेषु निष्पन्नः अच् अनुदात्तसंज्ञको भवति।
  - **समाहारः स्वरितः**[6] - यस्मिन् अचि उदात्त-अनुदात्तधर्मयोः समाहारः स्यात् सः स्वरितसंज्ञकः भवति।
- **मात्रा** - स्वराणाम् उच्चारणे यः कालः अपेक्ष्यते तस्याः नाम मात्रा अस्ति।

  **एषा मात्रा ह्रस्व-दीर्घ-प्लुतभेदेन त्रिविधा भवति -**

  - **ह्रस्वः** - एकमात्रिकः वर्णः ह्रस्वः उच्यते।
  - **दीर्घः** - द्विमात्रिकः वर्णः दीर्घः उच्यते।
  - **प्लुतः** - त्रिमात्रिकः वर्णः प्लुतः उच्यते।

  **उक्तं च** **एकमात्रो भवेद्ह्रस्वो द्विमात्रो दीर्घ उच्यते।**
  **त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रकम्॥**
- **बलम्** - वर्णानाम् उच्चारणसमये जायमानः प्रयत्नः उच्चारणस्थानं च बलं भवति।

  **बाह्यप्रयत्नः** - बाह्यप्रयत्नः एकादशप्रकारकः भवति – विवार-संवार-श्वास-नाद-घोष-अघोषः अल्पप्राण-महाप्राण-उदात्त-अनुदात्त-स्वरितभेदेन।

  **आभ्यन्तरप्रयत्नः** - आभ्यन्तरप्रयत्नः पञ्चविधः भवति – स्पृष्ट-ईषत्स्पृष्ट-ईषद्-विवृत- संवृतभेदात्।
- **सामः** - पाणिनीयशिक्षायाः अनुसारं वर्णानाम् उच्चारणं स्पष्टरूपेण स्यात्, स्वर-अर्थज्ञानसहितं प्रत्येकं वर्णानाम् शुद्धोच्चारणं कुर्यात्।
- **संतानः** - संहितापाठे प्रयुक्तेषु शब्देषु सन्धिनियमस्य योजनम्।

उपरि कथनानुसारेण ज्ञायते यत् षडङ्गेषु शिक्षायाः महत्त्वपूर्णं स्थानम् अस्ति। यदि वेदमन्त्राणां पठनसमये शुद्धोच्चारणे स्वरप्रक्रियायां च विशेषम् अवधानं न दद्मः, तदा इष्टप्राप्तिः न भवति। अपितु फलम् अनिष्टकारि भवति।

---

[4] लघुसिद्धान्तकौमुदी संज्ञासू. १.१. २९
[5] लघुसिद्धान्तकौमुदी संज्ञासू. १.१. ३०
[6] लघुसिद्धान्तकौमुदी संज्ञासू. १.१. ३१

यास्केन निरुक्ते लिखितं यत् -

**मन्त्रहीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तः न तमर्थमाह ।**

**स वाग्व्रजो यजमानं हिनस्ति, यथेन्द्रशत्रुः स्वरतोऽपराधात्[7] ।**

**(२) कल्पः -** शिक्षायाः अनन्तरं षडङ्गेषु कल्पसूत्राणां द्वितीयं स्थानं वर्तते । '**कल्पसूत्रम्**' इत्यत्रशब्दद्वयम् अस्ति - कल्प + सूत्र ।

कल्पस्य अर्थः भवति - विधिः, नियमः, न्यायः कर्म च

सूत्रस्यार्थो भवति – संक्षेपः इति ।

एवम्प्रकारेण पश्यामः चेत् कल्पसूत्रस्य सम्पूर्णः अर्थः भवति यस्मिन् - विधिविधानानि, न्यायनियमाः, रीतिव्यवस्थाः, कर्मानुष्ठानानां विधीनां वर्णनं दोषरहितं विवेचनं च अस्ति तत् कल्पसूत्रम् उच्यते ।

मनुष्याणां जीवनं सर्वाङ्गरूपेण विकसितं कर्तुम् अस्माकं पूर्वजैः ऋषिभिः गभीरचिन्तनानन्तरं निर्धारितं यत् व्यक्तितः समाजस्य निर्माणं भवति । एतया दृष्ट्या व्यक्तिं सुसंस्कारं कर्तुं षोडशानां संस्काराणां व्यवस्था कृता, एते संस्काराः श्रौतसूत्रे विद्यन्ते । श्रौत्रसूत्रं गृह्यसूत्रं धर्मसूत्रं स्मृतिग्रन्थाश्च एतस्यैव कल्पस्य अन्तर्गतमायान्ति । ऋग्वेदे यजुर्वेदे च कल्पशास्त्रस्य अनेके मन्त्राः उपलभ्यन्ते । कः मन्त्रः कस्मिन् संस्कारे प्रयोक्तव्यः एतस्य विचारः कल्पशास्त्रे अस्ति ।

- **कल्पसूत्राणि चतुर्षु भागेषु विभक्तानि सन्ति ।**

- **श्रौत्रसूत्रम्**
- **गृह्यसूत्रम्**
- **धर्मसूत्रम्**
- **शुल्बसूत्रम् ।**

- **श्रौत्रसूत्रम्** - अस्मिन् वैदिकयज्ञानां क्रमेण वर्णनम् अस्ति । प्राचीनग्रन्थानाम् उल्लेखेन ज्ञायते यत् त्रिंशदधिक-एकादशशतम् (११३०) मन्त्राः कर्मसूत्ररूपेण आसन् । किन्तु सम्प्रति चत्वारिंशत् (४०) एव कल्पसूत्राणि उपलभ्यन्ते, एतानि दर्शपौर्णमासियज्ञ-सोमयज्ञ-वाजपेयीयज्ञ-सौत्रामणीयज्ञ-अश्वमेधयज्ञेषु प्रमुखाणि सन्ति ।

---

[7] महाभाष्यम्

**अधुना कस्य वेदस्य किं श्रौत्रसूत्रम् अस्ति तत् पश्यामः -**

- ऋग्वेदस्य आश्वलायनं तथा च शाङ्खायनश्रौत्रसूत्रम् अस्ति ।
- यजुर्वेदस्य कात्यायनश्रौत्रसूत्रम् अस्ति ।
- कृष्णयजुर्वेदस्य बौधायन-आपस्तम्ब- सत्याषाढ-वैखानस-भारद्वाज-वाधुल-वाराह-काठक-मानव-श्रौतसूत्राणि सन्ति ।
- सामवेदस्य लाट्यायन-द्राह्यायण-जैमिनीयश्रौत्रसूत्राणि सन्ति ।

- **गृह्यसूत्रम्** - गृह्यसूत्रेषु गृहस्थजीवनेन सह सम्बद्धानां धार्मिकक्रियाकलापानां प्रतिपादनम् अस्ति । गर्भाधानात् आरभ्य अन्त्येष्टिपर्यन्तं षोडशानां संस्काराणां वर्णनम् अस्ति । एतदतिरिक्तं पञ्चमहायज्ञेषु सप्तगृह्ययज्ञेषु च - पितृयज्ञः, पावर्णयज्ञः, अष्टकयज्ञः, श्रावणीयज्ञः, अश्वायुजीयज्ञः आग्रहायणीयज्ञः चैत्रीयज्ञः च इत्येतेषां यज्ञानाम् अपि वर्णनम् अस्ति ।
- **धर्मसूत्रम्** - धर्मसूत्रेषु वैयक्तिकपवित्रतायाः कौटुम्बिकपवित्रतायाश्च विषये विशेषं बलं प्रदत्तम् अस्ति। धर्मसूत्रेषु नीति-धर्म-रीति-प्रथानां चतुर्णाम् आश्रमाणाम् अर्थात् ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-संन्यासानाम् वर्णनं प्राप्यते ।
- **शुल्बसूत्रम्** - शुल्बसूत्रस्य सम्बन्धः यज्ञवेदिनिर्माणेन सह सम्बद्धम् अस्ति । यज्ञवेदिनः मापनं निर्माणादीनां नियमानां वर्णनम् अस्ति शुल्बसूत्रेषु । प्रमुखाणि शुल्बसूत्राणि सन्ति - कात्यायन- बौधायन-आपस्तम्ब-मानवशुल्बसूत्राणि इति ।

**(३) व्याकरणम् - संक्षे**परूपेण वयं वक्तुं शक्नुमः यत् वेदाङ्गेषु व्याकरणस्य स्थानम् उच्चम् अस्ति। व्याकरणं विना कस्यापि वर्णस्य शुद्धोच्चारणम् असम्भवः अस्ति ।

यथा - पाणिनीयशिक्षायाम् उक्तम् अस्ति यत् **मुखं व्याकरणं स्मृतम्** । यतो हि शरीरस्य सर्वाणि अङ्गानि सम्पन्नानि सन्ति अपि यदि मुखं नास्ति तदा तत् शरीरं व्यर्थम् एव तथैव व्याकरणम् अपि अस्ति। **व्याकरणं वेदस्य मुखम् उक्तम् अस्ति** । वेदमन्त्राणां यथास्थानस्थापनम्, मन्त्राणाम् अर्थपुरस्सरं व्युत्पत्तिकरणं व्याकरणस्य प्रयोजनम् अस्ति ।

व्याकरणस्य अर्थः अस्ति - व्याक्रियन्ते विचिच्यन्ते शब्दाः अनेन इति व्याकरणम्, अर्थात् असाधुशब्देभ्यः साधुशब्दानां पृथक्करणमेवञ्च येन प्रकृतिप्रत्ययानां विवेचनं क्रियते तत् व्याकरणम् अस्ति । अस्मिन् विषये यजुर्वेदे अपि वर्णनम् आगच्छति-

**दृष्ट्वा रूपे व्याकरोत् सत्यानृते प्रजापतिः ।**

**अश्रद्धामनृतेदधाछ्द्धासत्ये प्रजापतिः[8] ।।**

[8] यजुर्वेदः १९ - ७७

महाभाष्यकारेण पतञ्जलिना व्याकरणस्य प्रयोजनम् एवम्प्रकारेण उच्यते -

**रक्षोहागमलघ्वसंदेहाः प्रयोजनम् ।**

- **रक्षा** - रक्षार्थं वेदानामध्येयं व्याकरणम् । लोपागमवर्ण-विकारज्ञो हि सम्यग्वेदान् परिपालयिष्यति।
- **ऊहा** - ऊहः खल्वपि । न सर्वैर्लिङ्गैर्न च सर्वाभिर्विभक्तिभिः वेदे मन्त्राः निगदिताः । ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः । तान् न अवैयाकरणः शक्नोति, यथायथं विपरिणमयितुम् । तस्मादध्येयं व्याकरणम् ।
- **आगमः** - ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति । प्रधानं च षट्स्वङ्गेषु व्याकरणम् । प्रधाने च कृतो यत्नः फलवान् भवति।
- **लघुः** - लघ्वर्थंचाध्येयं व्याकरणम्। ब्राह्मणेनावश्यं शब्दाः ज्ञेयाः इति । न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्याः ज्ञातुम्।
- **असन्देहः** - असन्देहार्थंचाध्येयं व्याकरणम् । याज्ञिकाः पठन्ति । स्थूलपृषतीमाग्नि-वारुणीमनड्वाहीम् आलभेतेति । तस्यां सन्देहः - स्थूला चासौ पृषती च स्थूलपृषती स्थूलानि पृषन्ति यस्याः सा स्थूलपृषतीति । तां न अवैयाकरणः रतोऽध्यवस्यति । यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः ।

**(४) निरुक्तम् - वेदेषु** षड्सु अङ्गेषु निरुक्तस्य स्थानम् अद्वितीयम् अस्ति । यथा शिक्षा, कल्पः, व्याकरणम्, छन्दः, ज्योतिषं च इत्येतानि स्वतन्त्रशास्त्राणि सन्ति तथैव निरुक्तम् अपि स्वतन्त्रशास्त्रम् अस्ति।

सम्प्रति यास्ककृतं निरुक्तम् एव अस्य विषयस्य प्रमाणिकग्रन्थः अस्ति । अस्मिन् आहत्य १४ अध्यायाः सन्ति । एतत् निघण्टुनामके वैदिककोषे आश्रितम् अस्ति । अतः एतत् वेदाङ्गरूपेण गृह्यते ।

यास्केन वैदिकदेवतावाचकानाम् अग्नि-इन्द्र-वरुण-इत्यादीनां विषयसम्बद्धानां मन्त्राणां चतुर्षु भागेषु विभागः कृतः ।

ते च सन्ति - आध्यात्मिक-आधिदैविक-आधिभौतिक-अधियज्ञाः इति ।

यास्केन स्वयं निरुक्ते पूर्ववर्तिनां निरुक्तकाराणां, कोशकाराणां वैयाकरणानां निघण्टुकाराणां नामानि उल्लिखितानि सन्ति – तानि सन्ति – १. **आग्रायणः २. औदुम्बरायणः ३. और्णनाभः** ४. **काथक्यः** ५. **क्रोष्टुकिः** ६. **गार्ग्यः** ७. **गालवः** ८. **चर्मशिरा** ९. **तैटीकिः १०. शतवलाक्षः ११ शाकपूणिः १२ स्थौलाष्टतीतिः १३. औपमन्यत १४. शाकटायनः १५. शाकल्यः १६. कौत्सः १७. और्णवामः १८. वार्ष्यायणि इति ।**

**निघण्टुः** - पञ्च-अध्यायेषु विभक्तः अस्ति - निघण्टोः प्रथमत्रिषु अध्यायेषु पर्यायवाचिनां यथा - पृथिवीवाचकानां, मेधावाचकानां, वाणीवाचकानां जलवाचकानाञ्च शब्दानां वर्णनपुरस्सरं विवेचनम् अपि अस्ति, येन कारणेन **नैघण्टुककाण्ड**मिति उच्यते । चतुर्थे अध्याये नैगमशब्दानां तथा च पञ्चमे अध्याये दैवतशब्दानाञ्च वर्णनं प्राप्यते । निघण्टुः निरुक्तात् भिन्नं वैदिककोषः आसीत् । यस्मिन् निरुक्तकारेण यास्केन भाष्यं लिखितम् । एतयोः द्वयोः भिन्नतायाः अनन्तरं सायणेन ऋग्वेदभाष्यभूमिकायाम् अपि निघण्टोः विषये उक्तम् अस्ति । निरुक्ते कः शब्दः कस्मिन् अर्थे अस्ति एतस्य प्रतिपादनं कृतम् अस्ति ।

**यथा** - **वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।**

**धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्**[9] ।।

वेदेषु येषां शब्दानां प्रयोगः येषु येषु अर्थेषु कृतः अस्ति, तेषां तेषाम् अर्थानां प्रामाणिकरूपेण उल्लेखः निरुक्ते कृतो वर्तते । अतः निरुक्तं वेदस्य आत्मा इति कथ्यते ।

**५. छन्दः** – अस्य व्युत्पत्तिः भवति - **चन्दयति आह्लादयति चन्द्यतेऽनेन वा 'चन्देरादेश्च छः'**[10] इत्यनेन सूत्रेण चकारस्य स्थाने छकारादेशे सति **छन्दः** इति शब्दः निष्पद्यते । यस्मिन् विभिन्नानाम् अक्षराणां संख्या निर्धारिता भवति । वेदमन्त्राणां लयबद्धतया विशुद्धज्ञानार्थम् अस्य शास्त्रस्य आवश्यकता अस्ति । यथा - पुष्पमाला अनेकविधपुष्पाणां संयोजनेन निर्मीयते तथैव वेदमन्त्राणाम् अपि अनेन शास्त्रेण संयोजनं क्रियते । बृहद्देवतायां वर्णनं प्राप्यते यत् छन्दः ज्ञानं विना यः वेदं पठति सः पापी अस्ति ।

अस्य तथ्यस्य प्रतिपादनं कुर्वन् वार्तिककारेण सर्वानुक्रमण्यां लिखितं यत् -

**अविदित्वा ऋषिच्छन्दो दैवतं योगमेव च ।**

**योऽध्यापयेज्जपेद्वापि पापीयान् जायते तुसः**[11] ।।

अर्थात् विना ऋषिं देवतां छन्दं ज्ञात्वा यः मन्त्राणाम् अध्ययन-अध्यापनं यज्ञादिकं- करोति, तस्य प्रत्येकं कार्याणि निष्फलानि भवन्ति । सः इष्टफलं न प्राप्नोति इति ।

सृष्टेः प्रारम्भकालादेव वाचः व्यवहारः प्रकारद्वयेन भवति स्म, सः च प्रकारः एकः गद्यमयः अपरश्च पद्यमयः च । यस्मिन् गणनायाः केचन स्वरवर्णाः अथवा व्यञ्जनवर्णाः निर्धारिताः भवन्ति, तस्य नाम पद्यमस्ति । पद्ये निश्चितवाक्यानां प्रयोगः भवति , अक्षराणां गणना च निश्चिता भवति ।

---

9 संस्कृतसाहित्यस्य समीक्षात्मकः इतिहासः

10 उणादिसूत्रम्

11 ऋक्-सूक्तसङ्ग्रहः

तथैव वेदेषु गायत्री, उष्णिक् त्रिष्टुप् चेत्यादीनि छन्दांसि भवन्ति। अतः एतेषां ज्ञानं छन्दशास्त्रं विना न भवति। छन्दःशास्त्रस्य उद्देश्यमस्ति यत् वैदिकमन्त्राणां समुचितरूपेण पाठस्य निर्धारणमिति।

**कात्यायनस्य अनुसारं** यदक्षरपरिमाणं तच्छन्दः अर्थात् संख्याविशेषे वर्णानां सत्ता छन्दः भवति। यतो हि प्रत्येकेषु वर्णेषु संख्या निर्धारिता वर्तते।

अस्य शास्त्रस्य प्रथमः आचार्यः पिङ्गलः मन्यते। एषः पाणिनेः लघुभ्राता अस्ति। एषः छन्दःसूत्रनामकं ग्रन्थं रचितवान्। यस्मिन् अष्ट अध्यायाः सन्ति। वेदेषु मुख्यरूपेण सप्तानां छन्दसां प्रयोगः मिलति।

- **एतानि छन्दांसि त्रिषु भागेषु विभक्तानि सन्ति -**
  - **त्रिपादयुक्ते छन्दसी** - गायत्री, उष्णिक्
  - **चतुष्पादयुक्तानि छन्दांसि** - अनुष्टुप्, त्रिष्टुप्, बृहती जगती च
  - **पञ्चपादयुक्तं छन्दः** - पङ्क्तिः

**पुनः एतदेव छन्दः भागद्वये विभक्तम् अस्ति -**

- **मात्रिकच्छन्दः** - येषां गणना मात्रानुसारेण स्यात् तत् मात्रिकच्छन्दः भवति।
- **वार्णिकच्छन्दः** - येषां गणना वर्णानाम् आधारेण स्यात् तत् वार्णिकच्छन्दः भवति।

एवम्प्रकारेण षडङ्गेषु छन्दःशास्त्रस्य महत्त्वम् अतुल्यमस्ति।

**६. ज्योतिषम् - ज्योतिः सूर्यादीनां ग्रहाणां गत्यादिकं प्रतिपाद्यतया अस्त्यस्मिन्निति ज्योतिषम्।** आकाशे स्थितेन सौर्यमण्डलेन सह सम्बन्धं स्थापयितृ शास्त्रं ज्योतिषमिति अस्ति। ज्योतिषशास्त्रेण कालस्य निर्धारणं भवति। कालस्य ज्ञानं सूर्यादिनवग्रहेषु आश्रितमस्ति। अस्माकं पूर्वजैः ऋषिभिः पार्थिवपदार्थानां ज्ञानेन सह नक्षत्रविद्यायाः सम्पादनमपि आवश्यकमनुभूतम्। चतुर्णां वेदानां मन्त्रेषु कालज्ञानाय पृथिव्या सह सम्बन्धं स्थापयितृणां नक्षत्राणां विषये एतेषां गतिविषये च ज्ञानं कारितम्।

**वेदाङ्गेषु ज्योतिषस्य वर्णनम् एवम्प्रकारेण प्राप्यते -**

**वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानि पूर्वा विहिताश्च यज्ञाः।**

**तस्मादिदं कालविधानशास्त्रं यो ज्योतिष वेदः स वेद यज्ञम्[12] ।।**

वयं जानीमः यत् वैदिकयज्ञानुष्ठादीनाम् आचरणसन्दर्भे शुभमुहूर्तस्य शुभकालस्य च आवश्यकता भवति । यज्ञनिष्पादनकर्ता एतत् चिन्तयति यत् यज्ञस्य आरम्भकालः समाप्तिकालः च एतौ द्वौ अपि अनुकूलौ स्तः, येन अभीष्टफलं प्राप्येत । ग्रहाणाम् अनुकूल-प्रतिकूलज्ञानार्थं यस्य वेदाङ्गस्यावश्यकता भवति तत् ज्योतिषमिति अस्ति । अस्मिन् शास्त्रे द्वादशराशीनां नवग्रहाणां नक्षत्राणां योगानां करणानां च विवरणं प्राप्यते ।

उपर्युक्तविवेचनेन स्पष्टं भवति यत् वैदिकसाहित्ये वेदाङ्गानां स्थानम् अतीव महत्त्वपूर्णम् अस्ति, एतत् अस्माकम् पूर्वजानाम् ऋषीणां तपसः फलमस्ति । ऋषयः शास्त्रीयचिन्तनानां क्रेन्द्रं वेदम् अमन्यन्त, एतस्मादेव कारणात् षडङ्गानां रचना कृता ।

***********

[12] वेदाङ्गज्योतिषम्, श्लो. ३